दिनाङ्क :-21.12.2024

प्रातः - 06:55

## प्रधानमन्त्री- कुवैतयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य कुवैतदेशस्य आमीर् शेख् मेशल् अल्-अहमद् अल्-जबेर अल्-सबाह् इत्यस्य आमन्त्रणे सति द्विदिवसीय-यात्रायां भविष्यति। अस्मिन्नवधौ प्रधानमन्त्री कुवैत-देशस्य नेतृभिः सह चर्चां करिष्यति। प्रधानमन्त्री कुवैत-देशे भारतीयप्रवासिभिः सह अपि संवादं करिष्यति। अपि च एकस्य श्रमिकशिबिरस्य भ्रमणं करिष्यति। असौ कुवैतस्य एमीरइत्यस्य विशिष्टातिथित्वेन षड्विंशतितमस्य अरेबियन गल्फकप इत्याख्यस्य उद्घाटनसमारोहे सम्मिलितो भविष्यति। श्वः प्रधानमन्त्रिणे मोदिने बायनपैलेस इत्यत्र गॉर्डऑफ ऑनरइति सम्मानं प्रदास्यते। तदनु श्रीमोदी कुवैतस्य युवराज्ञा सह उपवेशनानि विधास्यति। अपरत्र कुवैतस्य प्रधानमन्त्रिणा सहापि प्रतिनिधिमण्डलस्तरीया वार्ता विधास्यते इति। इयं त्रिचत्वारिंशत्वर्षेषु कस्यापि भारतीयप्रधानमन्त्रिण: खातिदेशानां प्रथमा यात्रा भवेदिति मन्यते। इयं यात्रा भारताय श्रेयस्कारिणी भवेदिति यतो हि कुवैतदेश: वर्तमानसमये खाति-सहयोग-परिषद: अध्यक्षपदम् अलङ्करोति इति।

## खोपराइतिमूल्यम्

आर्थिक-विषयाणां केन्द्रीयमन्त्रिमण्डलेन पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य सत्राय खोपराइति शुष्कनारिकेलफलस्य न्यूनतम-समर्थनमूल्यम् अनुमोदितम् । केन्द्रीयमन्त्रिमण्डलस्य उपवेशनान्तरं ह्य: सायं नवदिल्ल्यां वार्ताहरान् सूचयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: प्रोक्तवान् यत् एन.डी.ए.इति प्रशासनेन कृषकाणां कल्याणार्थं नैका: योजना: निर्मिता:। तेनोक्तं यत् एतत् निश्चप्रचं कृषकाणाम् आयाभिवर्धनं प्रति प्रशासनस्य प्रतिबद्धतां प्रदर्शयति।

## वित्तमन्त्री निर्मलासीतारामनः

केन्द्रीयवित्तमन्त्री निर्मलासीतारामन इत्येषा ह्यः राजस्थानस्य जैसलमेर-नगरे राज्यानाम् अथ च केन्द्रशासितप्रदेशानां वित्तमन्त्रिभिः सह पूर्व-आयव्ययिक-परामर्शस्य अध्यक्षतां कृतवती। अस्यां सभायां केन्द्रीय-वित्त-राज्यमन्त्री पङ्कजचौधरी विभिन्नानां राज्यानाम् मुख्यमन्त्रिणः उपमुख्यमन्त्रिणः च उपस्थिताः आसन्। प्रतिभागिनः आगामिन: आर्थिकवर्षस्य केन्द्रीय-आयव्ययकस्य विचारार्थं केन्द्रीयवित्तमन्त्रिणे बहुमूल्ययुतान् उपायान् दत्तवन्तः।

ऋतुविभाग:

भारतीयऋतुविज्ञानविभागेन अनुमान: प्रकटित: यत् जम्मूकश्मीर-हिमाचलप्रदशयो: आगामिषु षड्दिवसेषु अतिशैत्यप्रकोपस्य सम्भावना दृश्यते। विभागानुसारि एतादृशी स्थिति: पञ्जाब-राजस्थानप्रदेशयो: द्रष्टुं शक्यते इति। तत्रैव मध्यभारते आगामिषु चतुर्षु दिवसेषु न्यूनतमतापमानं द्वे उत वा त्रीणि डिग्रीसेल्सियससममितं यावत् भवितुं शक्यते इति।

ज्योतिरादित्यसिंधिया:

केन्द्रीयपूर्वोत्तरविकासमन्त्री ज्योतिरादित्यसिंधिया: अवदत् यत् अद्य केन्द्रीयगृहमन्त्रिण: अमितशाहस्य अध्यक्षतायाम् आयोक्ष्यमाणाया: पूर्वोत्तरपरिषद: द्विसप्ततितमम् पूर्णोपवेशनम् अस्य क्षेत्रस्य तीव्रविकासाय नवीनाधारशिलां स्थापयिष्यति। गतरात्रौ अगरतलां सम्प्राप्य एम्.बी.बी. इत्यतेस्मिन् विमानस्थानके वार्ताहरै: सह सम्भाषमाण: श्रीसिन्धिया: सूचितवान् यत् अग्रिमेषु दिनेषु पूर्वोत्तरक्षेत्रे विकासगति: तीव्रा भविष्यति यस्य परिकल्पना प्रधानमन्त्रिणा श्रीमतानरेन्द्रमोदिना कृता अस्ति।

क्रिकेट्

महिलानां क्रिकेट्-प्रतिस्पर्धायां भारतं श्व: मलेशियाया: कुआलालंपुरे प्रथमस्य अण्डर-19 इत्यतेस्या: एशियाचषकस्पर्धाया: नवदशवयोवर्गीय-द्वन्द्वस्य अन्तिमे चक्रे बाङ्ग्लादेशेन सह क्रीडिष्यति। स्पर्धाया: अस्या: प्रसारणं प्रात: काले सप्तवादने समारप्स्यते।

।।इति वार्ता:।।